No. १५६२

Title नञ्वादः

Author श्रीशिरोमणिभट्टाचार्यः

Extent ३ Age १

Subject न्यायशास्त्रं

नञ्वादः

१५७२

पत्र ३

न॰वा॰ श्रीगणपतये नमः। ॐ नमः सर्वभूतानि विष्टभ्य परितिष्ठते। अखंडानंदबोधाय पूर्णाय परमात्मने॥ १॥ संसर्गाभावो न्योन्याभाव
१ श्चनञोर्थः। तत्रानुयितावछेदकावछिन्नप्रतियोगिताकत्वमुत्पत्तिबललभ्यं। नीलघटवति न घटो नीलो घटो न घट इत्याद्य
व्यवहारात्। इह पीतघटवति न नीलो घटः पीतो घटो न नीलो घट इत्यादिव्यवहाराच्च। प्रतियोग्यभावान्वयो च तुल्ययो
गक्षेमौ। तेन घटत्यदोपस्थाप्यस्य प्रतियोगिनोनुयोगिन्याधाराधेयभावसंबंधेनैवान्वयबोधः। तत्रत्तसंसर्गाभावस्या
पि। पर्णी पचति चैत्रो न पचति चैत्रः चैत्रस्येदं धनं नेदं चैत्रस्यापि। अत्र तिङाद्यर्थस्य कृत्यादेः प्रथमान्तपदोपस्थाप्यस्या पि
तस्य वन्तत्र न येनितत द्भावस्यापि तथा। षष्ठ्यादेश्चैत्रादिनिरूपितस्वत्वादिकमर्थो न तु तन्निष्ठस्वामित्वादि। तस्य धनाद्य
वृत्तित्वेन चैत्रीयेपि धनेनेदं चैत्रस्येति प्रत्ययप्रसंगात्। निरूपकत्वादेः संबंधस्य प्रतियोगितानवच्छेदकत्वादितिदिक्।
पत्रवाधाराधेयभावो न संबंधमर्यादयालभ्यस्तत्रानुयोगिपदे सप्तम्यपेक्षा। यथा भूतले घटो भूतले न घट इत्यत्र। खण्डवता
त्पर्यवलात् कदाचिद्भूतलादौ घटाद्यभावः कदाचिद्घटादौ भूतलादिवृत्तित्वाभावः प्रतीयते। अतएव घटवियोगं घोन जल इ राम
१

त्यारोपप्रतीतेरेकविशेष्यकत्वानुभवः केचित्तु। यदत्र विशेष्यविशेषणभावो न आप्रत्याय्यते। अत एव भूतले घटो नास्ति घ
टौ न स्तः घटा न सन्तीत्यादौ भूतले घटो नास्तीत्यादाविव वचनैक्यनियम इति प्राहुः। तेषां जातो न समन्वेत्यत्र गतिश्चिन्तनीया।
जातिसमवेतत्वस्याप्रसिद्धत्वात्। संबंधान्तरेण जातिसंबन्धित्वस्य समन्वयासत्त्वात्। समप्रत्ययपीन्द्रियताभावस्य विशेषणात।
पाप्रतियोगिन्यन्वय इत्यपि केचित्तु। यत्र च विशेषणविशेष्ययोरभेदान्वयो श्रुत्यन्तरत्त्रान्योन्याभावो न आप्रत्याय्यते। प
पा घटो नीलो नायं पटो नील इति तत्र च विशेष्यविशेषणपदयोः समानविभक्तिकत्वम्। विरुद्धविभक्तिविरहो वा नंत्र। अ
तएव पश्यति पुत्रे यजामहे करोति नानुयाजेष्वित्यादौ एकवाक्यत्वानुरोधात् पुत्रेयजामह इत्यादेरनुषंगो गौरवाद्युय
ज्यतीति ष्ठनुयाजभेदो बोध्यते। विशेषणविभक्तिस्तत्प्रयोगसाधुत्वार्थं। नाम्नार्थयोर्भेदेनान्वयबोधे एव प्रकारीभूत
विभक्त्यर्थोपस्थितेरावश्यकत्वात्। लाघवेन तयोरन्वयबोधमात्रे तत्पार्थ्यं विशेषविभक्तिस्तु भेदार्थिका। नीलोत्पलं ग० ३
चित्रगुरित्यादौ लुप्तायाविभक्तेरनुसंधानमिति मतेनु तथा इत्यत्र षष्ठ्यर्थस्य संबन्धस्य वात्रापि समस्यमानपदस्याभेद
स्याभावो बोध्यते। यत्तु करणानिषेधे विकल्पापत्तेर्भेदपरतेति तन्न। विशेषनिषेधे सामान्यविधेस्तदितरतापर पर १

न॰ वा॰
२

ब्राह्मणेभ्यो दधि दीयतां कौंडिन्याय न दातव्यमित्यादौ व्यवस्थान्निसिद्धत्वेन विकल्पानवकाशात्। न च तत्रापि कौंडिन्यभेदबोधः।
कौंडिन्यपदस्य विरुद्धैकवचनावरुद्धत्वात्। न खलु महतो गाङ्गेन महतो राज्ञ इत्यत्रेव महतो राज्ञो न महतो गाङ्ग इत्यत्रापि राज्ञ
ति महद्भेदः प्रतीयते। एको द्वावित्यादिवत् कथंचित् तत्समर्थनेपि द्वितीयस्य दातव्यमित्यस्यानन्वयप्रसंगात्। अत एव रा
त्रौ श्राद्धं न कुर्वीतेत्यादौ करणनिषेधेपि न विकल्पावकाशः। नहि तत्रापि शास्त्रीतरपरतारात्रिभिन्नश्राद्धविधावपि अमावास्या
यामपि तेभ्यो दद्यात् इत्यादितो रात्रौ श्राद्धप्रसक्तेर्दुर्वारत्वात्। न खलु क्रियापरहितत्वमपि श्राद्धविधायकं वाक्यांतरमस्ति येनेदं
तेन सममेकवाक्यतामासादयेत्। नापीदं नानुयाजेष्वितिवत् पृथक् क्रियारहितं। अपरात्रौ श्राद्धस्य प्रसक्तौ विकल्पापत्तिः।
अप्रसक्तौ निषेधानुपपत्तिः। प्रसक्तो हि प्रतिषिध्यते इति चेत् साधीयानयं मंत्रपाठोयद्बलात् जलक्रीडेवृक्षिनीस्तीत्यादौ शाब्द
बोधेपि परमप्रवृत्तेन तत्र वह्निप्रसक्तिरूपादीयते। निषेधविधिर्वैयर्थ्यमिति चेत्। तोन्यथानवबोधनिबंधनरात्रिश्राद्ध
करणवारणस्य तदर्थत्वात्। एकविषयतया पुनस्त्वगतिकतया षोडशिग्रहणविरोधात्। अपि तु षोडशिग्रहणाभावदशमाध
नमित्यादिकं तु यत्र श्रुत्वान्नञ्समव्याहृतधात्वर्थस्याभावेपि विमत्यर्थान्वयः। अत एव प्राभाकराः। न कलंजं भक्षयेत् इति

राम
२

नेः। केवलं जन्मग्रहणाभावप्रयोजके कार्यमित्यर्पिताकूतः। नियमस्तु तात्पर्यवशात्। मुख्यफलाजनकत्वेपि ध्वंसस्य परमापूर्वरूपेष्टसाध
नत्वमविरुद्धं ग्रहणविध्यन्यथानुपपत्त्या चाशोऽधिग्रहणादतिशयं परमापूर्वं तस्माच्चातिशयितं मुख्यफलमिति सर्वमूलं जसे। प्रतियो 
ग्यभाववयोः प्रतियोग्यनुयोगिभावोधिकरणाभाववयोराधाराधेयभावस्तु संबंधविधया भासते। निर्यतातिरिक्ते स्थले स्वप्रा
तिपदिकार्थयोर्भेदान्वये प्रकाशीभूतविभक्त्यर्थोपस्थितेस्तंत्रत्वात्। भूतलं घट इवाद्यन्वयबोधेन षष्ठ्याद्यपेक्षा। अघटं भूत
लमसमेरे शाइत्यादौ समासे सामानाधिकरण्याद्यनुरोधात् नञोभाववत्परता। केचित्तु। प्रतियोगिपदोत्तरस्य सुपः प्र
तियोगित्वेऽनुयोगित्वे वा नञुत्तरस्य चाधिकरणत्वे नञो वाऽभाववति लक्षणा। विभक्त्यर्थानुयोगिसमानविभक्तिकार्थयो
रन्योऽन्याभावसंसर्गाभावबोधने तत्रोतसामर्थ्यं। तेन न पचति नराज इत्यादौ क्रियासंबंधादेरन्योन्याभावोऽभूतलं न घट इत्या
दौ संसर्गाभावो न प्रतीयत इत्याहुः॥ छ॥ इति श्रीशिरोमणिभट्टाचार्यकृतो नञ्वादः समाप्तः॥ छ॥ भवानीशंकराभ्यां नमः॥

परस्परपरिहारेणावस्थानं युतसिद्धं नयुतसिद्धमयुतसिद्धं